"रंघः संघो सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य ॥" )

रच, तु क क्ष्याम् । इति कविकल्पद्रुमः ॥ ( अदन्त चुरा०-पर०-सक०-सेट् । ) रचयति । इति दुर्गादासः ॥

रचनं, क्ली, (रचि+भावे ल्युट् ।) निर्म्माणम् । ग्रन्थनम् । यथा, जयदेवः । १ । ४ ।

"वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः । शृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धनः स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविः क्ष्मापतिः ॥"

रचना, स्त्री, (रच्यते इति । रच+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) कुसुमप्रकारादेः पत्रावल्यादेश्च रचनम् । तत्पर्य्यायः । परिस्पन्दः २ । इत्यमरः । २ । ६ । १३७ ॥ परिस्पन्दः ३ । इति भरतः ॥ ( यथा, साहित्यदर्पणे । ३ । १४६ ।

"भूषाणामर्द्धरचना वृथा विश्रणवेक्षणम् । रहस्याख्यानमीषच्च विच्छित्तिर्दयितान्तिके ॥" ) यथाक्रमेण स्थापनम् । तत्पर्य्यायः । निवेशः २ स्थितिः ३ । इति हेमचन्द्रः । ३ । ४११ ॥ ( यथा, महाभारते । ८ । ४६ । १० ।

"शृणु व्यूहस्य रचनामर्ज्जुनस्य यथागतः ॥" ) निर्म्मितिः । कृतिः । यथा,—

"असाधारणचमत्कारकारिणी रचना हि निर्म्मितिः ।" इत्यलङ्कारकौस्तुभे १ किरणः ॥ तत्पर्य्यायः । सन्दर्भः २ गुम्फः ३ ग्रन्थनम् ४ । ग्रन्थनम् ५ । इति हेमचन्द्रः । ३ । ३१७ ॥ ( उद्यमः । यथा, श्रीमद्भागवते । ३ । ६ । १० ।

"दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥"

"दैवेनाहताः सर्व्वतः प्रतिहताः अर्थानां रचनाः अर्थार्थोद्यमाः येषाम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ रचयतीति । रचि+ल्युः । टाप् । विश्वकर्म्मणो भार्य्या । यथा, श्रीमद्भागवते । ६ । ६ । ४४ ।

"त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका । सन्निवेशस्तयोर्ज्जज्ञे विश्वरूपश्च वीर्य्यवान् ॥" )

रचितः, त्रि, कृतः । रचधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः । यथा,—

"शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्ज्जितमिदम् ॥" इति पुष्पदन्तकृतस्तुतिः ॥

रजं, क्ली, ( रञ्जयतीति । रञ्ज+अच् । निपातनात् सिद्धम् । ) स्त्रीकुसुमम् । इति शब्दरत्नावली ॥

रजः, पुं, (रञ्जयतीति । रञ्ज+अच् । निपातनान्नलोपः ।) परागः । ( यथा, गो० रामायणे । ३ । ७६ । २६ ।

"पद्मपुष्परजोमिश्रो वृक्षान्तरविनिःसृतः । निश्वास इव सीताया वाङ्वाति मनोरमः ॥") रेणुः । ( "अर्थाः पादरजोपमाः ।" इति उज्ज्वलदत्तः । ४ । २१६ । ) गुणभेदः । आर्त्तवम् । इति जान्तवर्गे शब्दरत्नावली ॥ ( स्कन्दस्य सेनाविशेषः । यथा, महाभारते । ९ । ४५ । ७१ ।

"दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा ॥" विरजपुत्त्रः । यथा, विष्णुपुराणे । २ । १ । ४० ।

"त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः ॥" वशिष्ठपुत्त्रः ऋषिभेदः । यथा, विष्णुपुराणे । १ । १० । १३ ।

"ऊर्ज्जायान्तु वशिष्ठस्य सप्ताजायन्त वै सुताः । रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ॥" )

रजः [ स् ] क्ली, ( रज्यते रजतीति । रञ्ज+"भूरञ्जिभ्यां कित् ।" उणा० ४ । २१६ । इत्यसुन् ।) स्त्रीणां मासि मासि योनिनिःसृतरक्तम् । तत्पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ । इत्यमरः । २ । ६ । २१ ॥ ऋतुः ४ कुसुमम् ५ रजम् ६ । इति शब्दरत्नावली ॥ ( यथा, मनौ । ५ । १०८ ।

"रजसा स्त्री मनोदुष्टा सन्न्यासेन द्विजोत्तमः ॥" अस्य लक्षणं यथा,—

"रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् । अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥ रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते । तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"

"नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति ।" इति सुश्रुते सूत्रस्थाने १४ अध्यायः ॥

"मासि मासि रजःस्त्रीणां रसजं स्रवति त्र्यहम् । वत्सराद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥" इति वाभटे शारीरस्थाने प्रथमेऽध्याये ॥ )

प्रकृतेर्गुणविशेषः । तत्तु रागद्वेषात्मकं दुःखहेतुः । रजोऽदन्तः पुंलिङ्गोऽपि । यथा,—

"रजोऽयं रजसा साद्धं स्त्रीपुष्पगुणधूलिषु ।" इत्यमरदत्तः । इति भरतः ॥

महाभारतमते दुःखजनकगुणः । तस्य धर्म्मः कामः क्रोधः लोभः मानः दर्पश्च । इति मोक्षधर्म्मः ॥

"तृष्णा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः स्मृताः ॥" अभिसंरम्भो हेवाभिनिवेशः । इत्याश्वमेधिकपर्व्व ॥ अपि च ।

"काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥" इति श्रीभगवद्गीतायाम् । ३ अध्यायः ॥ अपि च ।

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः । निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥"

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् । तन्निबध्नाति कौन्तेय ! कर्म्मसङ्गेन देहिनम् ॥"

"सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत । ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ रजस्तमश्चाभिभूय सत्त्वं भवति भारत । रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"

"लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा । रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ! ॥"

"कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् । रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥" इति श्रीभगवद्गीतायाम् । १४ अध्यायः ॥

"सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः । कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥ प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च । तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः ॥ यदा कर्म्मसु काम्येषु प्रक्तिर्यशसि देहिनाम् । तदा त्रेता रजोवृद्धिरिति जानीहि शौनक ॥ यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः । कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः ॥ यदा सदानृतं तन्द्री निद्रा हिंसादिसाधनम् । शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥" इति गारुड़े २२७ अध्यायः ॥

परागः । इति मेदिनी । से, ३२ ॥ ( यथा, भागवते । ४ । २४ । २२ ।

"पद्मकोशरजो दिक्षु विधिपत्यवनोत्सवम् ॥") रेणुः । अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ॥ ( यथा, माघे । २ । ४६ ।

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति । स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥" ) निषिद्धानिषिद्धरजो यथा,—

"आयुष्कामो न सेवेत तथा सम्मार्ज्जनीरजः । तथाश्वरथधान्यानां गवाञ्चैव रजः शुभम् ॥ अशुभञ्च विजानीयात् खरोष्ट्राजाविकेषु च । गवां रजो धान्यरजः पुत्त्रस्याङ्गभवं रजः ॥ एतद्रजो महाशस्तं महापातकनाशनम् । अजारजः खररजो यत्तु सम्मार्ज्जनीरजः ॥ एतद्रजो महापापं महाकिल्बिषकारणम् ॥" इति गारुड़े ११४ अध्यायः ॥

( रात्रिः । इति निघण्टुः । १ । ७ ॥ उदकम् । यथा, ऋग्वेदे । १ । ५६ । ५ ।

"वियत्तिरोधरुणमच्युतं रजोतिष्ठिपो दिव आतासु बर्हणा ।" 'रज उदकम् ।' इति तद्भाष्ये सायणः ॥ भुवनम् । यथा, तत्रैव । १० । ८२ । ४ ।

"असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ।" "रजसि लोके ।" इति तद्भाष्ये सायणः ॥ ज्योतिः । यथा, तत्रैव । १० । ३२ । २ ।

"वीन्द्र यासि दिव्यानि रोचना विपार्थिवानि रजसा पुरुष्टुत ।" "रजसा व्याप्तीयेन ज्योतिषा । विद्युल्लक्षणेन यदा रजःशब्दाच्छस आकारः पार्थिवान् लोकान् ।" इति तद्भाष्ये सायणः ॥ )